**दिनाङ्क :- 16.08.2024** **सायम् - 06:20**

**मुख्यवार्ता:**

- निर्वाचनायोगेन जम्मू-कश्मीर-हरियाणाराज्ययोः च विधानसभानिर्वाचन-दिनांकस्य घोषणा कृता।
- जम्मू-कश्मीरे विधानसभानिर्वाचनं आगामिमासस्य अष्टादश-दिनाङ्कात् आरभ्य त्रिषु चरणेषु भविष्यति, तत्रैव हरियाणायां अस्मिन् वर्षे अक्टोबर्-मासस्य प्रथमे दिनांके एकस्मिन् चरणे निर्वाचनं भविष्यति।
- भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्गठनेन पृथिवीनिरीक्षण-उपग्रहः-शून्यम्-अष्ट इत्येतत् श्रीहरिकोटातः सफलतापूर्वक प्रक्षिप्तम्।
- राष्ट्रं श्वः तृतीयस्य वॉयस-ऑफ-ग्लोबल-साउथ इत्यस्य शिखर-सम्मेलनस्य नेतृत्वं करिष्यति।
- कोलकातानगरे एकस्य प्रशिक्षु स्नातकोत्तर चिकित्सिकायाः दुष्कर्मस्यानन्तरं हत्यायाः च विरोधे विभिन्नचिकित्सासङ्घैः निरन्तरं प्रदर्शनस्यानन्तरं अनेकेषु नगरेषु चिकित्सासेवा प्रभविता।
- भारतीय-चिकित्सासङ्घेन उद्घोषितं यत् श्वः प्रातः षड्वादनतः राष्ट्रव्यापिन्यः आपात्कालिकेतर-सेवाः बाधिताः भविष्यन्ति।

**सीईसी विधानसभानिर्वाचनं**

जम्मू-कश्मीरे विधानसभानिर्वाचनं आगामिमासस्य अष्टादश-दिनाङ्कात् आरभ्य त्रिषु चरणेषु भविष्यति, तत्रैव हरियाणायां अस्मिन् वर्षे अक्टोबर्-मासस्य प्रथमे दिनांके एकस्मिन् चरणे निर्वाचनं भविष्यति। जम्मू-कश्मीरस्य हरियाणायाः च मतदानस्य गणना अक्टोबर्-मासस्य चतुर्थे दिनाङ्के भविष्यति । मुख्यनिर्वाचनायुक्तः राजीवकुमारः अद्य नवदिल्ल्यां जम्मू-कश्मीर-हरियाणा-राज्ययोः निर्वाचनकार्यक्रमस्य घोषणां कृतवान्। जम्मू-कश्मीरे प्रथमचरणस्य मतदानं आगामिमासस्य अष्टादश-दिनाङ्के, द्वितीयचरणस्य मतदानं पञ्चविंशतिः दिनाङ्के, तृतीयान्तिमचरणस्य च मतदानम् अस्य वर्षस्य अक्टोबर्-मासस्य प्रथमे दिनांके भविष्यति। श्रीकुमारमहोदयेन उक्तं यत् लोकसभानिर्वाचनानन्तरं जम्मू-कश्मीरे परिवर्तितः परिदृश्यः अस्ति, लोकतन्त्रस्य स्तराः च सुदृढाः भवन्ति। सः अवदत् यत् आयोगः सद्यैव जम्मू-कश्मीर-हरियाणा-राज्ययोः गत्वा निर्वाचनसज्जतायाः अवलोकनं कृतवान्, जनानां मध्ये महान् उत्साहः अपि दृष्टः।

**इसरो**

भारतस्य नूतनं प्रक्षेपास्त्रम् लघु उपग्रहप्रक्षेपणयानम् (SSLV-D3) अद्य प्रातः पञ्च-दशमलवोत्तर-पञ्चसप्तत्यधिकैक-शतं यावत् किलोग्रामभारयुक्तेन पृथिवीनिरीक्षण उपग्रहेन-शून्यम् अष्ट इत्यनेन सह साफल्येन प्राक्षिपत्। तस्मिन् अपरः लघु उपग्रहः SR-0 आसीत् यत् चेन्नै-नगरस्य स्टार्टअप-संस्थायाः Space Rickshaw SR-0 इत्यनेन निर्मितम् आसीत्। भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्गठनेन (ISRO) इत्यनेन लघु-उपग्रहानां कृते विपण्य-प्रवृत्तेः आधारेण निम्न-पृथिवी-कक्षायां (LEO) पञ्चशतम् किलोग्राम यावत्-वहन-क्षमतया सह एसएसएलवी-विकसितम् अस्ति प्रायः सप्तदश निमेषाधिक नववादने षड्पञ्चाशत् कोटिरूप्यकाणां मूल्यव्ययेन चतुःत्रिंशत् मीटर् परिमितं यावत् ऊर्ध्वं प्रायः ऊनविंशत्यधिकैक शत टनभारयुतमं च व्यययोग्यं प्रक्षेपास्त्रं प्रथमप्रक्षेपणस्थानात् मुक्तः भूत्वा ऊर्ध्वं एकस्मिन्नेव दिशायां यात्रां आरब्धवान् पुच्छे स्थूलनारङ्गज्वालायुतः प्रक्षेपास्त्रं शनैः शनैः वेगं सङ्गृह्य ऊर्ध्वं ऊर्ध्वं च गच्छति स्म। परियोजनायाः उद्देश्यस्य विषये इस्रो इत्यनेन उक्तं यत् सः एसएसएलवी विकासपरियोजनां सम्पन्नं करिष्यति तथा च भारतीय उद्योगेन तथा सार्वजनिकक्षेत्रस्य न्यूस्पेस् इण्डिया लिमिटेड् इत्यनेन परिचालनयोजनां सफलं करिष्यति।

**विदश[illegible]मन्त्रालयः-वैश्विक-दक्षिणः**

राष्ट्रं श्वः तृतीयस्य वॉयस-ऑफ-ग्लोबल-साउथ इत्यस्य शिखर-सम्मेलनस्य नेतृत्वं करिष्यति। शिखरसम्मेलनस्य अस्य विषयो विद्यते-सततभविष्याय एकं सशक्तं वैश्विकदक्षिणम्। विदेशमन्त्रालयेन विज्ञापितं यत् शिखरसम्मेलनमिदं सङ्घर्ष-खाद्योर्जा-सुरक्षा-सङ्कटानां तथा च व्यतीतेषु शिखरसम्मेलनेषु सञ्जातचर्चानां विस्तारणाय मञ्चत्वेन कार्यं समाचरिष्यति।

**जम्मू-कश्मीर-आतंकविरोधः**

जम्मू-कश्मीरे आरक्षकदलेन जम्मूप्रान्तस्य अष्टजनपदेषु ऊनविंशतिः आतंकवाद-विरोधी-निरीक्षणदलानि संस्थापितानि। अस्माकं संवाददात्रा विज्ञापितं यत् अयं पदक्षेपः जम्मू प्रान्तस्य शान्तिपूर्णक्षेत्रेषु संवर्धमानानि आतंकप्रकरणानि समालक्ष्य समुत्थापितः। इमानि दलानि नवीनतम-संसाधनैः प्रशिक्षणैश्च सुसज्जितानि भविष्यन्ति। अनेन पदक्षेपेण जम्मूक्षेत्रे आतंकगतिविधयः न्यूनाः भविष्यन्ति। एतेषु प्रत्येकस्यापि प्रभागस्य नेतृत्वं कश्चन आरक्षण-उपाधीक्षकः विधास्यति।

**आपातकालीनस[illegible]:-**

कोलकातानगरे एकस्य प्रशिक्षु स्नातकोत्तर चिकित्सिकायाः दुष्कर्मस्यानन्तरं हत्यायाः च विरोधे विभिन्नचिकित्सासङ्घैः निरन्तरं प्रदर्शनस्यानन्तरं अनेकेषु नगरेषु चिकित्सासेवा प्रभविता। पटनायाम् अद्य पटना चिकित्सा महाविद्यालये चिकित्सालये च (PMCH) इत्यत्र तथा नालंदा चिकित्सा महाविद्यालये चिकित्सालये इत्येतयोः चिकित्सकाः अनिश्चितकालं यावत् प्रदर्शनं कृतवन्तः। अमृतसरे सर्वकारीयचिकित्सामहाविद्यालये चिकित्सकसङ्घः सर्वासु अत्यावश्यकसेवासु निलम्बनस्य घोषणां कृतवान्। गुरु नानक देव चिकित्सालये चिकित्सकैः विरोध प्रदर्शनं कृतवन्तः। महाराष्ट्रसङ्घः चिकित्सकसङ्घः, राज्ये चिकित्साप्रशिक्षुणां संघः अपि प्रदर्शने सम्मिलिताः। अद्य सायंकाले मुम्बईनगरस्य आजाद उद्याने विरोधयात्रया प्रदर्शनस्य आयोजनं करिष्यन्ति इति संघेन उक्तम्। भारतीय-चिकित्सासङ्घन उद्घोषितं यत् कोलकातानगरे सञ्जातस्य दुष्कर्मप्रकरणस्य अनन्तरं जाताया: महिला-चिकित्सकायाः हत्यायाः विरोधे श्वः प्रातः षड्वादनतः राष्ट्रव्यापिन्यः आपात्कालिकेतर-सेवाः बाधिताः भविष्यन्ति। अनेन सङ्घेन एकस्मिन् वक्तव्ये सूचितं यत् तस्मिन् समये आवश्यकसेवाः पूर्ववत् सञ्चालयिष्यन्ते। अपि च बाह्य-रोगि-विभागः कार्यं नैव करिष्यति। वैकल्पिक- शल्य-चिकित्सापि न करिष्यते। इयं घोषणा तेषु सर्वेषु क्षेत्रेषु क्रियान्विताभविष्यति यत्रापि आधुनिक-चिकित्सा-चिकित्सकैः सेवा प्रदीयते।

**स्वास्थ्यमन्त्रालयः**

केन्द्रीयस्वास्थ्यमन्त्रालयेन निर्देशः प्रदत्तः यत् संस्थाप्रमुखः चिकित्सकानाम् विरुद्धं हिंसायाः सन्दर्भे अधिकतमं षड्होरासु संस्थागत-FIR-इति पञ्जीकरणस्य उत्तरदायी भविष्यति। स्वास्थ्यसेवामहानिदेशकः अतुलगोयलः अस्मिन् विषये केन्द्रसर्वकारस्य चिकित्सालयानाम्, चिकित्सामहाविद्यालयानाञ्च प्रमुखाय पत्रं लिखितवान् अस्ति। कोलकातानगरे सद्यः एव एकस्याः चिकित्सिकायाः हत्यायाः प्रकरणे चिकित्सकैः विरोध प्रदर्शनानन्तरं एषः निर्देशः प्रदत्तः।

**जयशंकरः कुवैत दश[illegible]:**

विदेशमन्त्री डॉ.एस. जयशंकरः अस्य मासस्य अष्टादशदिनांके कुवैत देशस्य अधिकारिक-यात्रां करिष्यति। स्वीय-यात्रावधौ डॉ.जयशंकरः – समकक्षेण अबदुल्ला अली अल-याहया इत्यमुना सह मिलिष्यति। डॉ. जयशंकरस्य इयं यात्रा राजनैतिक-व्यापार-निवेश-ऊर्जा-सुरक्षा- सांस्कृतिकक्षेत्रेषु द्विपक्षीय सम्बन्धान् दृढीकरिष्यति। उभावपि पक्षौ परस्पर हितमालक्ष्य क्षेत्रीयान्ताराष्ट्रिय प्रकरणेष्वपि विचाराणां आदान-प्रदान करिष्यतः।

**<u>उपराष्ट्रपतिः-यात्रा</u>**

उपराष्ट्रपतिः जगदीप धनखडः अद्यप्रभृति तेलंगाना-आंन्ध्रप्रदेशयोः द्विदिवसीययात्रां विधास्यति। स्वीययात्रायाः प्रथमे दिवसे श्रीधनखडः तेलंगानायां कान्हा-शान्ति-वनम् इत्यस्य यात्रां करिष्यति। यात्रायाः द्वितीये दिवसे उपराष्ट्रपतिः नेल्लोरे अक्षरा-विद्यालय-परिसरस्य एवं कौशलविकासकेन्द्रस्य , स्वर्णभारतट्रस्ट एवं मुप्पावरपु इत्यस्य यात्रां करिष्यति।अनन्तरं सः मध्याह्ने आन्ध्रप्रदेशस्य वेंकटाचलमस्थाने स्वर्णभारतट्रस्ट इत्यस्य त्रयोविंशतिवर्ष-पूर्त्यवसरे समारोहे मुख्यातिथित्वेन भागं भजिष्यति।

**<u>भारत-वियतनाम देशौ</u>**

भारत-वियतनाम देशाभ्यां अद्य परस्पर – विकासाय वैश्विक कल्याणाय च सामुद्रिक – सहभागितां संवर्धितुं चर्चा विहिता।

**।। इति वार्ताः।।**